# श्री शिव मानस पूजा

रत्नैः कल्पित मानसं हिमजलैः स्न्नानं च दिव्याम्बरं |
नाना रत्न विभूषितं मृगमदा मोदाङ्कितं चन्दनम् || १ ||

जाती चम्पक बिल्वपत्र रचितं पुष्पं च धूपं तथा |
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् || २ ||

सौवर्णे नवरत्नखण्ड रचिते पात्रे घृतं पायसं |
भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम् || ३ ||

शाकाना मयुतं जलं रुचिकरं कर्पूर खण्डोज्ज्वलं |
ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु || ४ ||

छत्रं चामरयो र्युगं व्यजनकं चादर्शकं निर्मलं |
वीणा भेरि मृदङ्ग काहल कला गीतं च नृत्यं तथा || ५ ||

साष्टाङ्गं प्रणतिः स्तुति र्बहुविधा ह्येत त्समस्तं मया |
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो || ६ ||

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं |
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः || ७ ||

सञ्चारः पदयोः प्रदक्षिण विधिः स्तोत्राणि सर्वा गिरो |
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् || ८ ||

कर चरण कृतं वा कर्मजं वाक्कायजं वा |
श्रवण नयनजं वा मानसं वापराधम् || ९ ||

विहितम विहितं वा सर्वमेत त्क्षमस्व |
जय जय करुणाब्धे श्री महादेव शम्भो || १० ||

|| इति श्री शिव मानस पूजा सम्पूर्णं ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

www.viswakalyanam.org